अंक १९

संस्कृत पाठ माला ।

भाग १९ वाँ ।

लेखक तथा प्रकाशक,

श्रीपाद दामोदर सातवळेकर,

स्वाध्याय मंडल, औंध (जि. सातारा)

प्रथमवार.

संवत् १९८४, शक १८४९, सन १९२७

मूल्य पांच आने

वेदका अभ्यास !

इस भागसे वेदका अभ्यास प्रारंभ किया जाता है। यदि पाठकोंके पूर्वके संपूर्ण भाग अच्छी प्रकार तयार हुए हों, तो आगेकी पढाई उनके लिये कठिन नहीं होगी। इस लिये निवेदन है कि यदि पूर्वके कुछ भाग पुनः देखने हों तो देखकर ही आगेका अभ्यास प्रारंभ कीजिये। पहिली बुनियाद ठीक बननेके बाद ही उसपर रचा हुआ मकान ठीक प्रकार खडा रह सकता है। हमने तो अति सुगम रीति इस पुस्तकमें रखी है जो विना यत्न पाठक समझ सकेंगे। तथापि रीति कितनी भी सुबोध क्यों न हो पाठकोंके प्रयत्न की आवश्यकता तो होती ही है। इसलिये प्रार्थना है कि पाठक अपना प्रयत्न करें और इस पद्धतिसे लाभ उठावें।

स्वाध्याय मंडल
औंध (जि. सातारा)
१८—८—२७

लेखक,
श्री० दा० सातवळेकर.

मुद्रक तथा प्रकाशक- श्री० दा० सातवळेकर,
भारत मुद्रणालय, औंध (जि० सातारा)



संस्कृत पाठ माला।

भाग उन्नीसवाँ।

पाठ १

वेदकी पढाईके लिये शब्दोंकी सिद्धि कैसी होती है यह जानने की अत्यंत आवश्यकता है। धातुसे प्रत्यय लगकर शब्द बनते हैं, इस विषयमें इससे पूर्व बताया जा चुका है।शब्दमें धात्वर्थ प्रधान होता है, इसीको यौगिक अर्थ कहा जाता है। धातु के अर्थ की प्रधानता यौगिक अर्थ में होती है। जो शब्द एक ही दिखाई देता है वह भी अनेक प्रकारसे वेदमें सिद्ध हुआ होता है, इस लिये एक ही शब्दके अनेक अर्थ वेदमें होते हैं और लौकिक संस्कृतमें भी एक शब्द के अनेक अर्थ होते हैं। इसकी कुछ कल्पना पाठकों को देने के उद्देश्यसे यहां कुछ शब्द सिद्ध करके बताते हैं-

"असुर"।

यह असुर शब्द ही प्रथम देखिये। सबसे प्रथम यह शब्द नञ्तत्पुरुष है ऐसा दिखाई देता है जिसका विग्रह-

न सुरः असुरः।

"जो सुर नहीं वह असुर" समझना योग्य है। यह शब्द "अ+सुर" ऐसा लिखना योग्य है।

यह अर्थ वेदमें होगा तो बहुत ही अल्प स्थानों पर है। यहअर्थ आधुनिक ग्रंथोंमें बहुत प्रचलित है वेदमें इसी शब्दके अन्यान्य अर्थ प्रचलित हैं जो हम इसी पाठमें आगे देते हैं—

असु + रः = असून् राति ददाति।

जो (असु) प्राण (राति) देता है, जो दूसरोंको प्राणशक्ति देता है उसका नाम असुर है। असुका अर्थ है जीवनशक्ति, उसका प्रदान करनेवाला परमात्मा है इसलिये उसका नाम असुर है। यह शब्द "असु+ र" ऐसा लिखना चाहिये। इसके उदाहरण देखिये-

१ स्वस्ति पूषा असुरो दधातु नः = (नः) हमें (असुरः पूषा) जीवन शक्ति देनेवाला पोषक ईश्वर (स्वस्ति) कल्याण (दधात्) देवे । (ऋ० ५। ५१। ११)

२ असुरः पिता नः = (नः) हम सबका (पिता) जनक (असु-रः) जीवन देनेवाला ईश्वर है । (ऋ० ५। ८३। ६)

३ जनानां यो असुरो विधर्ता = (जनानां)लोगोंका जो जीवन दाता ईश्वर(विधर्ता)विशेष धारण करनेवाला है। (ऋ०७।५६।२४)

इन मंत्रों में असुर शब्द के ये अर्थ पाठक देखें । असुर शब्दका तीसरा अर्थ(असुषु रमते)असु अर्थात् प्राणोंमें जो रमता है, यह है। राक्षसवाचक असुर शब्द जिन मंत्रोंमें होता है उस समय यह अर्थ प्रधानतया होता है, क्यों कि जो अपने शारीरिक प्राणकी सजावट के लिये ही प्रयत्नशील होते हैं ।

असुरहा सपत्नहा । ऋ. १० । १७० । २

" (असुरहा) राक्षसोंको मारनेवाला (सपत्नहा) शत्रुओं को मारनेवाला " इत्यादि प्रसंगोंमें असुर शब्दका अर्थ राक्षस है, ऐसे स्थानों में असुरका अर्थ जो सबसे प्रथम दिया है वह भी यहां लिया जा सकता है ।

" अस् " धातुका अर्थ " दूर फेंकना " है । इससे भी (अस्यति इति असुरः) जो वीर बाणोंको शत्रुपर दूर फेंकता है वह असुर अर्थात् शूरवीर है। यह अर्थ भी वेद में कई स्थानों में है, इसका अर्थ शूरवीर होता है ।

एकही असुर शब्दके इस प्रकार तीन अर्थ होते हैं और और भी अधिक अर्थ होने संभवनीय हैं। इन अर्थोंका नाम यौगिक अर्थ है क्यों कि इन सब अर्थोंमें धातुके मूल अर्थकी प्रधानता होती है।

शब्दोंके अर्थोंके तीन भेद होते हैं (१)एक यौगिक अर्थ, (२) दूसरे योगरूढिक अर्थ और (३) तीसरे केवल रूढि अर्थ। इनमें रूढिके अर्थ भाषामें प्रसिद्ध हैं । हाथी, घोडा, गाय आदि शब्द रूढिके हैं, इनका उच्चार करते ही विवक्षित जानवर की कल्पना सन्मुख आती है। इस शब्द का रूढार्थ यह है, यह हरएक जानते ही हैं।

परंतु संस्कृत में " अश्व " शब्द घोडेका वाचक होता हुआ भी मूल अर्थका बोध करता है जैसा (अश्नुते अध्वानम्) अर्थात् "जो मार्गको खा जाता है वह अश्व है" जिसको भाषामें घोडा कहते हैं। इसलिये अश्व शब्द रूढा अर्थ में प्रयुक्त होता हुआ भी यौगिक अर्थ को बताता है। इसी प्रकार " पाचकः " (पकाने-वाला, रसोईया) आदि बहुत शब्द हैं। इनको योगरूढी शब्द कहा जाता है। ये रूढ शब्द भी हैं और यौगिक भाव भी बताते हैं।

केवल यौगिक शब्द कैसा विलक्षण अर्थ बताते हैं इसके उदाहरण इससे पूर्व स्थलमें दिये ही हैं। ये वेदके यौगिक और योग रूढिके शब्द संस्कृत भाषामें पूर्ण रूढिके शब्द बने हैं। रूढिके शब्द बननेपर भी उनका मूल यौगिक भाव बिलकुल हटा नहीं है। इसीलिये संस्कृत भाषाके प्रायः सभी शब्द यौगिक हैं ऐसा कई व्याकरणाचार्य और प्रायः सभी निरुक्ताचार्य मानते हैं और वेद का अर्थ करने के समय इसी शैलीका अनुसरण करते हैं।

वेदका अर्थ करने वालों को या वेदका पठणपाठन करनेकी इच्छा करने वालों को इस प्रकार शब्दोंके मूल अर्थ जाननेकी शक्ति अपने अंदर बढानी चाहिये। क्योंकि इसीसे वेदका अर्थ जाननेकी संभावना है अन्यथा वेदका गूढार्थ जानना असंभव है।

पाठ २

रामायणम् ।

श्रीरामचंद्रस्यादेशानुसारेण सर्वेऽपि वानरयोधा दक्षिणां दिशं प्रतस्थिरे । महेन्द्रं अथ पर्वतं संप्राप्य रामः शिखरमारुरोह । सह्यं मलयं च समतिक्रम्यानुपूर्व्येण सर्वे समुद्रमासेदुः । धौतोत्पलां च वेलां स्पृष्ट्वा राम उवाच " इयमत्र प्राप्ता पूर्वोपस्थितैव चिन्ता । तदिह प्रस्तूयताम् मन्त्रः । " इति ।

सुग्रीवस्तदा सेनां तीरे न्यवेशयत् । सागरसमीपस्थितं तत्सैन्यं द्वितीयः सागर इव विरराज । " सागरश्चाम्बरप्रख्यः, अंबरं च सागरोपमम् । सागराम्बरयोर्मध्ये न कोऽपि विशेषो दृश्यते । " इति वानराः परस्परं वदन्तस्तत्र सर्वेऽपि तं सागरं प्रशशंसुः ।

अत्र लंकायां रावणस्तु सुहृदामसन्मानात्सीताकाममोहितो भूत्वा च पापो राक्षसः कृशत्वं प्राप्तः । अतीते च काले सभां अकारयत् । तदा रावणस्य मंत्री महापार्श्वो महाबलः तं प्रोवाच- " हे रावण ! शत्रून् मूर्धस्वाक्रम्य सीतया रमस्व, कस्त्वां प्रतिषेद्धुं शक्नोति । अतोऽलं विचारेण । " इति ।

रावणस्तु तमकथयत्- " पुरा प्राप्ताद्वेधसः शापाद्भीतोऽस्मि । स शाप एवमासीत्- यदि बलादन्यां नारीं गमिष्यसि मूर्धा ते शतशो भेत्स्यतीति - अतएव बलात्सीतां शयने नारोहये । रामस्तु मे बलं जानात्येव । अतः किं करोमीति चिंतये । "

तदा बिभीषणः प्रत्युवाच- "धर्मानुवर्तिना तेन रामेण सह त्वया वैरं कर्तुं न योग्यम् । अतो दीयतामस्य सीता । बंधुत्वात् प्रसादये

त्वाम् । कुरुष्व मम वचनम् । न्यायेन यो राजकार्याणि करोति स एव निश्चितार्थमतिः पश्चान्न सन्तप्यते । " इति ।

रावणस्तु कालप्रेरितो बिभीषणं हितं ब्रुवन्तमब्रवीत्— "बिभीषण ! त्वं तु शत्रुसेवी स्वार्थप्रयुक्तः सन् एवं भाषसे न त्वादृशेष्वनार्येषु सौहृदं संभवति । योऽन्य एवं ब्रूयात् अस्मिन्नेव मुहूर्ते स न भवेत् एव । हे कुलपांसन ! त्वां तु धिक् एवास्तु । नात्र तिष्ठ, गच्छान्यत्र कुत्रचित् । " इति ।

न्यायवादी बिभीषणस्तु चतुर्भी राक्षसैः सह तदा गदापाणिर्भूत्वा उदतिष्ठदब्रवीच्च रावणं— " हे रावण ! न स्थितोऽसि धर्मपथे, भ्रान्तोऽसि । अनेनाधर्ममार्गेण गच्छन्नाशमेव शीघ्रं गमिष्यसि । अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः । अतोऽहं गच्छामि त्वं आत्मानं स्वकीयां पुरीं च यथासुखं रक्ष । "

इत्येवमुक्त्वा बिभीषणो रामस्य समीपमाजगाम । चतुर्भिः सह राक्षसैरागच्छन्तं बिभीषणं दृष्ट्वा सुग्रीव उवाच-"पश्यैष राक्षसोऽस्मानेव हन्तुमत्राभ्येति । " इति ।

बिभीषणस्तु तत्रागत्य नातिदूरे व्यतिष्ठत उवाच च- "दुर्वृत्तस्याहं रावणस्यानुजो बिभीषणः । स तु मे हितमप्युक्तं न प्रतिजग्राह, दासवच्चाहं तेनावमानितः । अतः पुत्रदारांश्च त्यक्त्वा राघवं शरणमागतोऽस्मि । निवेदयत मां तस्मै सर्व लोकशरण्याय रामाय " इति ।

सुग्रीवस्तु राममब्रवीत्—" अतर्कितः शत्रुः समयं लब्ध्वा अस्मान्निहन्यात् । अन्तर्धानगता ह्येते राक्षसा अविश्वसनीयाः । न तेषां विश्वसेत् । " इति ।

श्रुत्वैतद्रामः सुग्रीवमुवाच— " परमर्षिणा कण्डुना पुरा गाथा प्रकीर्तिता यत्र तेन उक्तम्— शत्रुमपि दीनं याचन्तं शरणागतं न हन्यात् । आर्तो वा यदि वानार्तः परेषां शरणं

गतोऽरिः प्राणानपि परित्यज्य कृतात्मना वीरेण रक्षितव्यः। अत आनयैनं बिभीषणमत्र। मया दत्तं अस्याऽभयं। असौ बिभीषणो भवतु स्वयं वा रावणो भवतु।" इति।

सुग्रीवस्तदा प्रत्युवाच — "ममाप्यन्तरात्मा बिभीषणं शुद्धं वेत्ति। अनुमानाच्च भावाच्चासौ सर्वतः सुपरीक्षितः। सख्यित्व-मभ्युपैतु तस्माद् बिभीषणः। इति।"

बिभीषणस्ततः सन्नतः सहानुचरो रामसमीपमुपसृत्योवाच-भवद्गतं हि मे राज्यं जीवितं सुखानि च" इति।

रामस्ततो राक्षसानां बलाबलं तं पप्रच्छ। सोप्याख्यातुमुप-चक्रमे — "वरदानात्स्वयंभुवः सर्वभूतानामवध्योऽयं दशग्रीवः। रावणान्तरो मम ज्येष्ठश्च भ्राता कुम्भकर्णो युधि शक्रप्रतिबलः। रावणस्य च सेनापतिः प्रहस्तो नाम विश्रुतो येन कैलासे मणिभद्र पराजितः। इन्द्रजित्तु पुत्रो रावणस्य बद्धगोलांगुलित्रोऽवध्य-कवचश्च संग्रामेऽस्ति। महोदर-महापार्श्वा-कम्पनाश्चास्यानीकपा लोकपालसमाः। विद्यन्ते चास्य रक्षसां दशकोटिसहस्राणि सैन्ये।" इति।

श्रुत्वैतद् बिभीषणवचो रामेण दशग्रीवं हत्वा बिभीषणाय राज्य-दानं तत्रैव प्रतिज्ञातम्। समुद्राच्च जलमानीय लक्ष्मणहस्तेन रक्षसां राजेति तत्रैव चाऽसौ बिभीषणोऽभिषिक्तः।

ततो रामो अप्रमत्तः नियमं पालयन् कुशास्त्रीर्णायां सागर-वेलायां तिस्रो निशाः प्रतिशिश्ये।

तदा वानरसैन्यस्य प्रस्थानाय नलोऽपि वानरः तत्र सेतुं कर्तुं प्रचक्रमे। वानराः पादपान् बभञ्जुस्तान् तत्रानयामासुश्च। सागर-पूरणार्थं तैः पर्वतवत्प्रस्तरा अप्युत्पाट्यन्ते। प्रक्षिप्यमाणैस्तैर्वृक्ष-प्रस्तरादिभिः सहसा सागरजलमुद्धृतम्। रामस्याज्ञापुरःसरै-र्वानरै प्रथमेनाह्ना चतुर्दश योजनानि सेतुबंधनं कृतम्। पञ्चभि-

स्त्वहोभिः सेतुः संपूर्णः शुशुभे । असौ सेतुर्दशयोजन-विस्तीर्णः शतयोजन आयतश्चासीत् । कोटिसहस्राणि वानराणां सेतुं बध्वा सागरस्य पारं जग्मुः । वानरयूथपास्ततो लंकायां भेरीमृदंगशब्दं शुश्रुवुः । अमृष्यमाणाश्च तद्घोषं स्वयमपि घोषवत्तरं विनेदुः । प्लवंगगर्जितं च तद्राक्षसैरपि श्रुतम् ।

ततोऽरिंदमौ रामलक्ष्मणौ लंकामासेदुः । न्यविशन्त च लंकाम् । रामलक्ष्मणावुत्तरं द्वारं रुरुधतुः । नीलमैन्दद्विविदाः पूर्वं द्वारम्, अंगदश्च दक्षिणं, पश्चिममपि हनूमान् रुरुधे । मध्यमे गुल्मे सुग्रीवः समतिष्ठत सह सुषेणपवनादिभिर्वानरैः । सहजास्त्ववांस्तु सुषेणो रामस्य पश्चिमेन तस्थौ । एवं द्रुमपाणिभिर्वानरैर्लंका वायुनाऽपि दुष्प्रवेशा सर्वतः संवृता । ततो रामोऽगदं दशग्रीवं प्रति प्रेषयामास । संदिदेश च— "येन बलेनाधममामयया सीतां हृतवानसि तद्बलमधुना दर्शय । अराक्षसं लोकं कर्ताऽस्मि यदि नाभ्येषि शरणं मां सीतामादाय । धर्मात्मा बिभीषणश्च ध्रुवं लंकैश्वर्यं प्राप्नोति । न हि क्षणमपि शक्यमधर्मेण राज्यं त्वया भोक्तुम् । " इति ।

रामप्रेषितोऽगदोऽपि रावणं ददर्श सामात्यम् । रामवचनं च तं श्रावयामास । तच्छ्रुत्वा सरोषं रावणः शशास— " वध्यतामयमिति ।" दीप्ताग्निरिव रजनीचरास्तं जगृहुः । अंगदोऽपि बलं दर्शयितुं स्वयमेवात्मानं ग्राहयामास । पश्चाद् बाहुद्वयासक्तांश्च तान्राक्षसानादायोत्पपात । तद्वेगेन निर्धूताश्च ते भूमौ निपतिताः । वालिपुत्रोऽगदोऽपि सत्वरं रामपार्श्वमुपागतः ।

समासाः

१ वानरयोधाः = वानराणां योधाः ।

२ पूर्वोपस्थिता = पूर्वं एव उपस्थिता ।

३सागरसमीपस्थितं=सागरस्य समीपम्।सागरसमीपे स्थितं ।

४ कालप्रेरितः = कालेन प्रेरितः।
५ शत्रुसेवी = शत्रुं सेवते इति।
६ स्वार्थप्रयुक्तः = स्वार्थेन स्वार्थाय वा प्रयुक्तः।
७ गदापाणिः = गदा पाणौ यस्य सः।
८ अधर्ममार्गः = न धर्मः अधर्मः। अधर्मस्य मार्गः।
९ धर्मपथः = धर्मस्य पथः।
१० अविश्वसनीयः = न विश्वसनीयः।
११ परमर्षिः = परमश्चासौ ऋषिश्च।
१२ वृक्षप्रस्तरादयः = वृक्षाश्च प्रस्तराश्च वृक्षप्रस्तराः। ते आदिः येषां ते वृक्षप्रस्तरादयः।
१३ सेतुबंधनं = सेतोः बंधनं।
१४ दीप्ताग्निः = दीप्तश्चासौ अग्निः।

शब्द।

आदेश = आज्ञा
योधः = वीर
प्रतस्थिरे = चले
आसेदुः = प्राप्त हुए
अंबरं = आकाश
शत्रुसेवी = शत्रुका आश्रय करने वाला
कुलपांसन = कुलका कलंक
अप्रमत्त=उन्मत्त न होता हुआ
दुर्वृत्त = दुराचारी
अनुज = छोटा भाई
अतर्कित= जिसकी परीक्षा नहीं हुई है।
अंतर्धान = गुप्तता
कृतात्मा = आत्मिक बलसे युक्त
आर्त = दुःखी
पादप = वृक्ष

———

पाठ ३

वेदके शब्दोंके विषयमें थोडासा इससे पूर्व कहा, अब और थोडासा इस पाठमें कहना है। इस पाठके लिये हम " इन्द्र " शब्द लेते हैं-

इन्द्रं ।

इस शब्दकी उत्पति कई प्रकार मानी हुई है। ऐतरेय उपनिषद में-

इदं+द्र = इन्द्र

(इदं) इसमें (द्र) सुराख करनेवाला, इसका भेदन करनेवाला इसको तोडने मोडनेवाला। शरीरमें यह इन्द्र इन्द्रियोंके स्थानमें सुराख करता है, इस शरीरका भेदन करके अपने कार्य के लिये जैसे चाहे वैसे द्वार बनाता है, इसलिये इस आत्मा का नाम इन्द्र है।

बिजुली भी इन्द्र कहलाती है इसलिये कि वह जहां गिरती है उसको छिन्न भिन्न करती है। उपनिषदों और ब्राह्मण ग्रंथों में दिये इन्द्रके ये अर्थ बडे मनन करने योग्य हैं। इन ग्रंथोंमें लिखा है कि पहिला शब्द " इदं-द्र " था, जिसका सुगम रूप "इन्द्र" बना है। यह यौगिक अर्थ देखनेकी पद्धति वेदाभ्यासीको विचार करने योग्य है। इन्द्र शब्दका दूसरा अर्थ-

इन् + द्र

(इन्) शत्रुओंका (द्र) विदारण करनेवाला, शत्रुका नाश करनेवाला, यह है। इन्द्र और राक्षसोंके युद्धोंका वर्णन वेदमें बहुत स्थानों में है और हरएक स्थान में इन्द्र का विजय और राक्षसों का पराजय लिखा है। इस प्रकार यह अर्थ भी सार्थ प्रतीत होता है। इन्द्र शब्द का तीसरा अर्थ-

इदं + दर्शनं = इन्द्र

(इदं) इसका दर्शन करता है अर्थात् यह देखता है, इस कारण इस का नाम इन्द्र है। इस जगत् का द्रष्टा आत्मा है, वह जगत् को देखता है इसलिये उसको इन्द्र कहते हैं। यहां "दर्शन" शब्दका पहिला टुकडा "दर्" ही रहा है, शेष शब्दभागका लोप होगया और "इदं + दर = इदं + द्र = इन्द्र" इस क्रमसे यह शब्द बना है। इन्द्र शब्दका चतुर्थ अर्थ-

इन्धे भूतानि

"जो सब भूतों को प्रकाशित करता है" वह सबका प्रकाशित करनेवाला सूर्य, विद्युत् या परमात्मा इन्द्र है। इस प्रकार इस शब्दके अनेक अर्थ होते हैं, परंतु सबके सब अर्थ यहां देनेकी आवश्यकता नहीं है अब इस शब्दके कुछ उदाहरण देते हैं-

इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः।
रथीतमं रथीनां वाजानां सत्पतिं पतिम्॥ ऋ०१।११।१

जो (रथीनां रथीतमं) रथियोंमें श्रेष्ट रथी और(वाजानां पतिं) बलोंका स्वामी है और जो(सत्पत्ति)उत्तम स्वामी है तथा (समुद्र-व्यचसं) समुद्रके समान विस्तृत, व्यापक (इंद्रं) प्रभु है उसकी (विश्वाः गिरः) हमारी सब वाणियां(अवीवृधन्)स्तुति करती हैं। अर्थात् ऐसे शत्रुनाशक समर्थ प्रभुकी हम स्तुति करते हैं। तथा-

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते।
त्वामभि प्रणोनुमो जेतारमपराजितम्॥२॥ ऋ० १।११।२

हे (इन्द्र) प्रभो! हे (शवसः + पते) बलके स्वामी! (ते-सख्ये) तेरी मित्रतामें रहकर हम (वाजिनः) बलवान बनकर (मा भेम) डरते नहीं। (जेतारं) शत्रुका विजय करनेवाले और (अ--पराजितं) कभी पराजयको न प्राप्त होनेवाले (त्वां) तुझे हम (अभि-प्रणोनुमः) नमन करते हैं।

इद्रं वो विश्वतस्परि हवामहे जनेभ्यः ।
अस्माकमस्तु केवलः॥ ऋ० १ । ७ । १० ॥

(वः जनेभ्यः) आप लोगोंके लिये (विश्वतः परि) सबके ऊपर (इन्द्रं हवामहे) प्रभुकी प्रशंसा करते हैं। वह प्रभु (अस्माकं) हमारा ही केवल बनकर (अस्तु) रहे ।

इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम्॥ ऋ०१।३३।१

(इन्द्रस्य) इन्द्रके (वीर्याणि) पराक्रम (नु) निश्चयसे (प्रवोचं) मैं कहता हूं (यानि) जो (प्रथमानि) पहिले पराक्रम (वज्री) वज्र लेनेवाला वीर (चकार) करता रहा । उसने (अहिं) शत्रुका (अहन्) वध किया (अपः अनुततर्द) जल को फैलाया और (पर्वतानां) पर्वतोंसे (वक्षणाः) नदियां (प्र अभिनत्) भेदन करके चलाईं।

इन्द्रो यातोऽवसितस्य राजा शमस्य च शृंगिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ॥
ऋ० १ । ३२ । १५

(वज्र-बाहुः) वज्र हाथमें पकडनेवाला (इन्द्रः) प्रभु (यातः अवसितस्य) जंगम और स्थावर का तथा (शमस्य शृंगिणः च) शांत और सींगवालों का (राजा) राजा है। (स राजा इत् उ) वह राजा ही निश्चयसे (चर्षणीनां) प्रजाओंका (क्षयति) निवास करता है। (अरान् नेमिः न) आरे जैसे रथचक्रकी नाभीके साथ होते हैं उस प्रकार (ताः परि बभूव) वह प्रजाएं उसके चारों ओर रहती हैं ।

इस प्रकार पाठक इन्द्रके मंत्रोंका विचार करें। इन्द्र देवताकी कल्पना इस प्रकार हो सकती है और मंत्रोंका इस प्रकार पाठ करके पाठक बहुत लाभ भी प्राप्त कर सकते हैं।

पाठ ४

रामायणम् ।

ततः कृत्स्नं प्राकारपरिखान्तरं वानरीकृतं सर्वे राक्षसा ददृशुः। रामश्च मनसैव पीड्यमानां सीतां जगाम। क्षिप्रमाज्ञापयामास च वानरान् द्विषतां वधाय। तेऽपि वानरास्तृणपांसुपर्वताग्रैः परिखां पूरयन्तो लङ्कां ममन्थुः। रावणोऽपि राक्षसानां सैन्यनिर्याणमाज्ञापयामास। ततस्तेषां संग्रामो देवासुरसंग्राम इवाऽतिघोरः समपद्यत। राक्षसानां वानराणां च मांसशोणितकर्दमः संबभूव। रात्रिश्च प्रवृत्ता, तदा निशायुद्धमभूत्। राक्षसाः प्लवगान् भक्षयन्तः परिपेतुः। युद्धे बलिनो वानरा राक्षसीं चमूमक्षोभयन्। तदा भूमिः शोणितस्रावकर्दमा बभूव।

ये तु राक्षसा रामस्याभिमुखे युद्धार्थं स्थितास्ते सर्वे रामशरताडिता मृताः। इन्द्रजित्तु वालीपुत्रेणांगदेन हताश्वो हतसारथिर्भूत्वा तत्रैवान्तरधीयत। तदा च सर्वे वानरा वालिपुत्रं तुष्टुवुः। अन्तर्धानगतस्तु रावणपुत्र इन्द्रजिदशनिवर्चसो बाणान्मुमोच। अन्तर्धानगतेन तेन चोक्तम्– "शक्रोऽपि मामेवमनालक्ष्यं युध्यमानमासादितुं न शक्तः। किं पुनर्युवाम्, एष वां यमसादनं नयामि।" इति। एवं तौ रामलक्ष्मणौ शरशल्याचितौ प्रकम्पितौ जगत्यां निपेततुः। प्रथमं रामः पपात विद्धो रावणिना येन पुरा शक्रो जितः। एवं पतिते रामे विजयं प्राप्ते च राक्षसे हनूमत्प्रमुखाः सर्वेऽपि वानरा अन्वशोचन्त। राक्षसान्हर्षयन् रावणपुत्र इन्द्रजिल्लंकां पुरीं प्रविवेश। ततः सीतां त्रिजटया सह पुष्पकमारोप्य विमानं चालयामास रावणः। घोषयामास च "हतौ रणे रामलक्ष्मणौ" इति।

विमानेन गत्वाऽपि सीता सर्वान्निपतितान्ददर्श। शरतल्पगतौ च रामलक्ष्मणौ दृष्ट्वा दुःखार्ता सीता करुणं विललाप- " उत्सादितं कुलं त्वया, कैकेयि! कलहशीलया। हा हताऽस्मि विधवा। ममैवानार्याया हेतोः सागरमुत्तीर्य रामो गोष्पदे हतः। रामस्योपरि मां क्षिप्रं घातय, रावण! समानय पत्ना पतिम्। " इति।

त्रिजटा तु राक्षसी परिदेवयमानां सीतामब्रवीत्- " जीवति ते भर्ता। मा विषादं कृथाः। तथाहि वैदेहि! नेदं दिव्यं पुष्पकं विमानं त्वां धारयेद्यद्येतौ गतजीवितौ। नेमौ रणे सेन्द्रैरपि सुरासुरैः शक्यौ जेतुम्। " इति। एतस्मिन्नंतरे पुष्पकं लंकां विमानमागतम्।

ततो भयाविष्टं सुग्रीवं विभीषणोऽब्रवीत्- " अलं त्रासेन। निगृह्यतां बाष्पवेगः। एवं प्रायाणि युद्धानि। नास्ति नैष्टिको विजयः। सभाग्यशेषताऽस्माकमस्त्येव यत एतौ घोरेण शरबन्धेनैव बद्धौ दशरथात्मजौ, नैतौ मृतौ। " इति।

अन्तरे तु रामः स्थिरत्वात्सत्त्वयोगाच्च सलक्ष्मणः प्रत्यबुध्यत। राघवौ नीरुजौ दृष्ट्वा वानरयूथपाः सिंहनादं विनेदुः पुनश्च युद्धकामा लंकाद्वाराण्युपाजग्मुः।

रावणो नदतां वानराणां शब्दं श्रुत्वा राक्षसानाज्ञापयामास- " ज्ञायतां किमेतत् " इति। ते तु राक्षसाः राघवौ शरबंधेन विमुक्तौ दृष्ट्वा विषेदुः। धूम्राक्षो नाम राक्षसो हनूमन्तं गदया मस्तके प्राहरत्। हनूमानपि तस्य शिरसि महान्तं प्रस्तरमपातयत्। तस्मिन्राक्षसे मारुतिना हतेऽपरोऽपि वज्रदंष्ट्रो नाम राक्षस आगतः सोऽगदेन निपातितः। ततः सेनाध्यक्षेण प्रेषितोऽकम्पनो नाम राक्षसः आगतः स मारुतिना हतः। ततः सेनापतिं प्रहस्तं स्वयं वृक्षमुत्पाट्य नीलस्ताडयामास। विधनश्च कृतोऽसौ नीलेन

वाहिनीपतिः। सोऽपि नीलं मुसलेनाजघान ललाटे। अत्रान्तरे नीलेन प्रहिता शिला प्रहस्तस्य शिरो बिभेद। हते च प्रहस्ते स्वयं राक्षसराड् रावणो निर्ययौ। तमागतं दृष्ट्वा रामो बिभीषणमुवाच- "अहो! दुष्प्रेक्ष्यो रावणो दीप्तमहातेजा आदित्य इव रश्मिभिः। दिष्ट्या पापात्मा दृष्टिपथं गत" इति।

ततो रामो रावणं अभ्यद्रवत्। तदा हनूमांस्तु तं प्रार्थयामास- "पृष्ठं मे समारुह्य राक्षसं शास्तुमर्हसि।" इति। रामस्तथा कृत्वा रथस्थं ददर्श रावणम्। इन्द्र इव वज्रेण मेरुं तरसा बाणेनेन्द्रशत्रुं चासौ जघान। रक्षोधिपतेरर्कवर्णं किरीटं च चिच्छेद। निकृत्तचापो हताश्वसूतश्च विह्वलन् राजा रावणो लंकां विवेश।

आत्मानं च समरे जितं सेनापतिं प्रहस्तं च निषूदितं ज्ञात्वा, रक्षो भीमबलं आदिदेश रावणः। आज्ञापयच्च- "कुंभकर्णो निबोध्यताम्।" इति। ततस्ते राक्षसा महद्भक्ष्यमादाय कुंभकर्णगुहां ययुः। ते सर्वे प्रयत्नेन तं सुप्तं प्रत्यबोधयन्। अन्नस्य च राशिं पुरतः कृत्वा शंखान् विनेदुः। स त्वेवं प्रतिबुद्धः सर्वमन्नं भक्षयामास। तृप्तं च तं सर्वे पर्यवारयन्। अकालबोधनाद्विस्मितोऽसौ तानपृच्छत्- "किमर्थं प्रतिबोधितोऽस्मि। अथवा भयमिह किमप्युत्पन्नं भवेत् इति मन्ये।" स तत उत्थाय गत्वा च रावणं ददर्श। तस्य चरणौ ववन्दे, कृत्यं चा ऽपृच्छत्। सर्वं कथयित्वा रावणो ऽब्रवीत्- "पश्य सर्वं वानरैराक्रान्तमस्ति। त्रायस्व मां बालवृद्धावशेषितां लंकां च।" इति।

कुंभकर्णस्तु प्रहस्योवाच- "अयमासादितस्त्वया महान् दोषः परस्त्रीहरणेन। शीघ्रमेव त्वां पापस्यैतस्य फलं प्राप्स्यते। भवतु। तथापि बन्धुस्नेहसदृशं कार्यं मयावश्यमेव कार्यम्। अत इदानीं शत्रुकंदनाय गमिष्यामि।" इति।

कुंभकर्णमागतं दृष्ट्वा प्रथमं वानरा भीतिं प्राप्ताः । परंतु वालिसुतस्यांगदस्य प्रोत्साहनात्तु ते सर्वेऽपि क्रुद्धास्तं शिला-पादपादिभि र्निर्जघ्नुः । असावपि वानरसैन्यानि ममन्थ । तदा रामस्य सायकाः कुंभकर्णं विव्यधुः । सोऽपि शृंगं नाम महास्त्रं रामस्योपरि चिक्षेप । रामस्तदा वायव्यास्त्रेणास्य बाहुं जहार । अन्योऽपि बाहुरैन्द्रेणास्त्रेण रामेण कृत्तः । तथैवास्य पादावपि रामेण बाणैर्लूनौ । अन्तं गत्वा ऐन्द्रं शरं निशितमादाय कुंभकर्णस्य शिरोऽपि रामश्चकर्त, तेन स राक्षसः पपात ममार च।

एवं सर्वान्राक्षसान् हत्वा अन्ते रावणमपि संहत्य लंकाया राज्यं विभीषणाय रामः प्रददौ । सीतां चादाय, तस्या अग्निशुद्धिं कृत्वा, ततस्तां परिशुद्धां ज्ञात्वा, तया सह पुष्पकं विमानं समारुह्य सर्वै-र्वानरैः सह अयोध्यां प्राप्तो रामः । तदा रामं सर्वे अयोध्यावासिनः राज्ये अभिषिंचितवन्तः । तस्य रामचंद्रस्य राज्ये सर्वेऽपि मानवाः हृष्टाः पुष्टास्तुष्टाः सन्तः इह लोके पुष्टिं लब्ध्वाऽन्ते मुक्तिमपि प्रापुः । इति ।

समासाः ।

१ प्राकारपरिखान्तरं = प्राकारश्च परिखा च प्राकारपरिखे तयोः अन्तरं ।

२ तृणपांसुपर्वताग्राः = तृणं च पांसुश्च पर्वताग्रं च ।

३ देवतासुरसंग्रामः = देवाश्च असुराश्च । तयोः संग्रामः ।

४ मांसशोणितकर्दमः = मांसं च शोणितं च । तयोः कर्दमः ।

५ शोणितस्रावकर्दमा = शोणितस्य स्रावः । तेन कर्दमयुक्ता ।

६ रामशरताडितः = रामस्य शरः । तेन ताडितः ।

७ वालीपुत्रः = वालिनः पुत्रः ।

८ हताश्वः = हतः अश्वः यस्य ।

९ हतसारथिः = हतः सारथिः यस्य ।

१० शरशल्याचितः = शरस्य शल्यं । तैः आचितः ।
११ शरतल्पगतः = शरस्य तल्पं । तत्र गतः ।
१२ दुःखार्ता = दुःखेन आर्ता ।
१३ कलहशीला = कलहयुक्तं शीलं यस्याः ।
१४ गतजीवितः = गतं जीवितं यस्मात् ।
१५ भयाविष्टं = भयेन आविष्टं।
१६ वानरयूथपाः = वानराणां यूथानां पालकाः ।
१७ युद्धकामाः = युद्धं कामः येषां ते ।
१८ अकालबोधनं = न काल अकालः तस्मिन् बोधनं ।
१९ बालवृद्धावशेषिता = बालाश्च वृद्धाश्च । ते अवशेषिताः यत्र ।

शब्द ।

कृत्स्नं = संपूर्ण
प्राकार = कीलेकी दिवार
परिखा = खंदक
शोणित = रक्त
प्लवगः = वानर
अंतरधीयत = गुप्त हुआ
गोष्पदे = गायके पांवके समान छोटे स्थानपर
नीरुजौ = नीरोग
समर = युद्ध
आक्रान्त = व्याप्त
निशित = तीखा
शित = ,,

पांसु = धूलि
तृणं = घास
निर्याणं = प्रयाण
कर्दमः = कीचड
स्राव = प्रवाह
अनालक्ष्यं = न दीखवनेवाला
बाष्पवेगः = आंसुओंका वेग
नष्ठिकः= निश्चयसे मिलनेवाला
रश्मिः = किरण
बोधन = जगाना
कंदनं = नाश
परिशुद्ध = पवित्र

पाठ ५

मरुत् ।

मरुत् देवता इन्द्रके साथ रहनेवाली है, इसलिये इसका विचार इन्द्र देवताके साथ होना योग्य है। इससे पूर्व इन्द्र देवताका विचार हुआ अब इस पाठमें मरुत् देवताका विचार करते हैं-

" म्रियन्ते इति मरुतः " अर्थात् मरते हैं इसलिये इनको मरुत् कहते हैं। " मर्त्य, मर्य " आदि शब्दके समान अर्थ वाला ही यह "मरुत्" शब्द है।

वीर लोग युद्ध में मरनेके लिये तैयार होते हैं, यह अर्थ मरुत् शब्द में देखा जाता है। इस कारण वेद में मरुद्देवताके मंत्रों में बहुत कर के वीरोंका ही वर्णन होता है, यही अर्थ-

"मर्+उत्" इन शब्दों में देखा जाता है। मरनेके लिये जो उठते हैं वे मरुत् कहलाते हैं। सच्चे वीर ही मरनेके लिये कटि बद्ध रहते हैं, इसी लिये सच्चे वीरोंका वर्णन मरुत्सूक्तों में होता है।

" मा+रुद् " (मत् रोना) यह अर्थ इस प्रकार शब्द विभाग करनेपर मिलता है। जो रोते नहीं वे मरुत् कहलाते हैं। हास्यमुखी वीरोंका भाव इस शब्द में भी है। युद्ध उपस्थित होनेपर वीर लोग आनंद करते हैं, कभी डरते नहीं और कभी रोते नहीं। यह भाव भी पूर्वोक्त भाव के साथ मिलता जुलता है यह बात पाठक मनन पूर्वक देखें।

❀

" मा+रुध् " (मत् प्रतिबंध करना) जो स्वयं किसीको प्रतिबंध नहीं करते और जिनको कोई प्रतिबंध कर नहीं सकता। यह भी एक वीरोंकाही लक्षण है। क्यों कि वीर कभी दूसरों की उन्नति में रुकावट नहीं डालते, नाही अपनी उन्नति में किसी को रुकावट डालने देते हैं।

" मा+रुत् " (मत् शब्द करना) अर्थात् जो बहुत बोलते नहीं, बहुत बकवाद नहीं करते, जो करनेका कर्तव्य हो वह करते हैं परंतु बहुत शब्दजाल नहीं फैलाते। यह व्युत्पत्तिभी मरुतों का एक विलक्षण गुणधर्म बता रही है। वीरों के अंदर यह गुणधर्म अवश्य चाहिये अन्यथा जिनकी शक्ति शब्दजाल फैलाने में व्यर्थ खर्च होगी वे लोग पौरुष कर्म कर ही नहीं सकेंगे।

मरुत् शब्द के ये यौगिक अर्थ निरुक्तकार के दिये हैं, पाठक इन अर्थों को देखें और जानें कि वेद के शब्दों के यौगिक अर्थ कैसे होते हैं। शब्द एक ही होता है, परंतु उस के विभाग करके प्रत्येक विभाग के अर्थ देखने से विविध अर्थों की प्राप्ति होती है। इन अर्थों को ध्यानमें धरकर नीचे लिखे मंत्रोंका अभ्यास अब कीजिये—

ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः।
मरुद्भिरग्न आगहि ॥ ऋ० १।१९।५

(ये) जो (शुभ्राः) गौरवर्ण (घोर वर्पसः) बडे शरीर वाले (सु क्षत्रासः) उत्तम क्षत्रिय तथा (रिशादसः) शत्रु का नाश करनेवाले हैं, उन (मरुद्भिः) मरुतोंके साथ, हे अग्ने, (आगहि) आओ।

मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन ।
गिरींरचुच्यवीतन ॥ ऋ०१ । ३७ । १२

हे (मरुतः) मरुतो ! (यत् ह) जो निश्चयसे (वः बलं) आपका बल है जिससे आप (जनान्) लोगोंको (अचुच्यवीतन) प्रेरित करते हैं और (गिरीन्) मेघोंको भी (अचुच्यवीतन) हटा देते हैं ।

प्र यदित्था परावतः शोचिर्न मानमस्यथ ।
कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः॥ १ ॥
स्थिरा वः सन्त्वायुधा पराणुदे वीळू उत प्रतिष्कभे ।
युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ॥ २ ॥
ऋ० १ । ३९ ।

हे (मरुतः) मरुतो! (शोचिः न) प्रकाशके समान (परावतः) दूरसे दिखाई देनेवाला (यत् मानं) जो वीरताका प्रमाण आप (इत्था) इस प्रकार (प्र अस्यथ) छोड देते हैं। (कस्य क्रत्वा) किस के कर्मसे (कस्य वर्पसा) किस के रूपसे या आकारसे आप (कं याथ) किसके पास जाते हैं और तुम्हारी (धूतयः) कंपाने वाली शक्तियां (कं) किसको हिलाती हैं?॥(वः आयुधा) आपके शस्त्र (स्थिराः सन्तु) स्थिर हों, तुम्हारे शस्त्र (परा-नुदे) शत्रु को दूर करनेवाले कर्मके लिये और (प्रतिष्कभे) शत्रुको प्रतिबंध करने केलिये (वीळू) बलवान हैं (युष्माकं) आपकी (तविषी) शक्ति (पनीयसी) प्रशंसनीय (अस्तु) होवे वैसी (मायिनः) कपटी (मर्त्यस्य) मनुष्यकी (मा) न हो ।

मरुतोंका यह वर्णन पाठक देखें ।

वि ये भ्राजन्ते सुमखास ऋष्टिभिः प्रच्यावयन्तो
अच्युता चिदोजसा । मनोजुवो यन्मरुतो रथेष्वा
वृषव्रातासः पृषतीरयुग्ध्वम् ॥ ऋ०१ । ८५ । ४

हे (मरुतः) मरुतो ! (ये) जो आप (सु-मखासः) उत्तम कर्म करनेवाले होकर (ऋष्टिभिः) शस्त्रोंसे (वि-भ्राजन्ते) चमकते हैं और (ओजसा) शक्ति से (चित्) निश्चयपूर्वक (अ-च्युताः) न हिलने वालों को भी (प्रच्यावयन्तः) हिला देते है । आप (मनोजुवः) मनके समान वेगवान् होते हुए (वृष-व्रातासः) बैलों और गौवोंके अनेक झुंडोंको पास रखनेवाले अपने (रथेषु) रथोंको (पृषतीः) नानारंगवाले पशुओंको (अयुग्ध्वम्) जोतते हैं ।

यूयं तत्सत्यशवस आविष्कर्त महित्वना ।
विध्यता विद्युता रक्षः ॥ ऋ० १ । ८६ । ९

(यूयं) आप (सत्य-शवसः) सत्य बलवाले हैं । अपने (महित्वना) महत्वसे (आविष्कर्त) प्रकट होते हैं और (विद्युता) बिजलीके समान चमकवाले शस्त्रसे (रक्षः) दुष्ट राक्षसोंको (विध्यत) वेध करते हो, काटते हो ।

इस प्रकार मरुत देवताके मंत्रोंका अध्ययन पाठक करें और वीरताका पाठ सीखें ।

पाठ ६

महाभारतम् । (भीष्मपर्व अ. ९९)

सञ्जय उवाच ।

ततः शान्तनवो भीष्मो निर्ययौ सह सेनया ।
व्यूहं चाव्यूहत महत्सर्वतो भद्रमात्मनः ॥ १ ॥

कृपश्च कृतवर्मा च शैव्यश्चैव महारथः ।
शकुनिः सैन्धवश्चैव काम्बोजश्च सुदक्षिणः ॥ २ ॥

भीष्मेण सहिताः सर्वे पुत्रैश्च तव भारत ।
अग्रतः सर्व सैन्यानां व्यूहस्य प्रमुखे स्थिताः ॥ ३ ॥

द्रोणो भूरिश्रवाः शल्यो भगदत्तश्च मारिष ।
दक्षिणं पक्षमाश्रित्य स्थिता व्यूहस्य दंशिताः ॥ ४ ॥

अश्वत्थामा सोमदत्तश्चावन्त्यौ च महारथौ ।
महत्या सेनया युक्ता वामं पक्षमपालयन् ॥ ५ ॥

दुर्योधनो महाराज त्रिगर्तैः सर्वतो वृतः ।
व्यूहमध्ये स्थितो राजन्पाण्डवान्प्रति भारत ॥ ६ ॥

अलम्बुषो रथश्रेष्ठः श्रुतायुश्च महारथः ।
पृष्ठतः सर्व सैन्यानां स्थितौ व्यूहस्य दंशितौ ॥ ७ ॥

एवं च तं तदा व्यूहं कृत्वा भारत तावकाः ।
सन्नद्धाः समदृश्यन्त प्रतपन्त इवाग्नयः ॥ ८ ॥

ततो युधिष्ठिरो राजा भीमसेनश्च पांडवः ।
नकुलः सहदेवश्च माद्रीपुत्रावुभावपि ॥ ९ ॥

अग्रतः सर्व सैन्यानां स्थिता व्यूहस्य दंशिताः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्च महारथः ॥ १० ॥
स्थिताः सैन्येन महता परानीकविनाशनाः ।
शिखण्डी विजयश्चैव राक्षसश्च घटोत्कचः ॥ ११ ॥
चेकितानो महाबाहुः कुन्तिभोजश्च वीर्यवान् ।
स्थिता रणे महाराज महत्या सेनया वृताः ॥ १२ ॥
अभिमन्युर्महेष्वासो द्रुपदश्च महाबलः ।
युयुधानो महेष्वासो युधामन्युश्च वीर्यवान् ॥ १३ ॥
केकया भ्रातरश्चैव स्थिता युद्धाय दंशिताः ।
एवं तेऽपि महाव्यूहं प्रतिव्यूह्य सुदुर्जयम् ॥ १४ ॥
पाण्डवाः समरे शूराः स्थिता युद्धाय दंशिताः ।
तावकास्तु रणे यत्ताः सहसेना नराधिपाः ॥ १५ ॥
अभ्युद्ययू रणे पार्थान्भीष्मं कृत्वाऽग्रतो नृप ।
तथैव पांडवा राजन्भीमसेन पुरोगमाः ॥ १६ ॥
भीष्मं योद्धुमभीप्सन्तः संग्रामे विजयैषिणः ॥
श्वेडाः किलकिलाः शङ्खान्ककचान्गोविषाणिकाः ॥ १७ ॥
भेरी मृदङ्गपणवान्नादयन्तश्च पुष्करान् ।
पाण्डवा अभ्यवर्तन्त नदन्तो भैरवान्रवान् ॥ १८ ॥
भेरीमृदङ्गशङ्खानां दुन्दुभीनां च निःस्वनैः ।
उत्कृष्टसिंहनादैश्च वल्गितैश्च पृथग्विधैः ॥ १९ ॥
वयं प्रतिनदन्तस्तानगच्छाम त्वरान्विताः ।
सहसैवाऽभिसंक्रुद्धास्तदासीत्तुमुलं महत् ॥ २० ॥
ततोऽन्योन्यं प्रधावन्त संप्रहारं प्रचक्रिरे ।
ततः शब्देन महता प्रचकम्पे वसुंधरा ॥ २१ ॥

पक्षिणश्च महाघोरं व्याहरन्तो विबभ्रमुः ।
सप्रभश्चोदितः सूर्यो निष्प्रभः समपद्यत ॥ २२ ॥

ववुश्च वातास्तुमुलाः शंसन्तः सुमहद्भयम् ।
घोराश्च घोर निर्हादाः शिवास्तत्र वव्याशिरे ॥ २३ ॥

वेदयन्त्यो महाराज महद्वैशसमागतम् ।
दिशः प्रज्वलिता राजन्पांसुवर्षं पपात च ॥ २४ ॥

रुधिरेण समुन्मिश्रमस्थिवर्षं तथैव च ।
रुदतां वाहनानां च नेत्रेभ्यः प्रापतज्जलम् ॥ २५ ॥

ततः शांतनवः शंतनुपुत्रो भीष्मः सेनया सह निर्ययौ । सर्वतो भद्रं नामकं महद्व्यूहं च आत्मनः सैन्यस्य अव्यूहत ॥ १ ॥ कृपश्च कृतवर्मा च महारथः शैब्यश्च शकुनिः सन्धवः सिंधुराजा च सुदक्षिणः कांबोजः कंबोजदेशाधिपतिश्च एव ॥ २ ॥ हे भारत ! तव पुत्रैः भीष्मेण च सहिताः सर्व सैन्यानां अग्रतः व्यूहस्य च प्रमुखे स्थाने स्थिताः ॥ ३ ॥ हे मारिष! धृतराष्ट्र ! द्रोणो भूरिश्रवाः शल्यः भगदत्तश्च व्यूहस्य दक्षिणं पक्षं आश्रित्य दंशिता रक्षिताः स्थिताः ॥ ४ ॥ अश्वत्थामा सोमदत्तः महारथौ आवन्त्यौ अवन्तिदेशीयौ राजानौ महत्या सेनया युक्ता व्यूहस्य वामं पार्श्वं अपालयन् ॥ ५ ॥ हे महाराज राजन् ! त्रिगर्तैः सर्वतो वृतः दुर्योधनः व्यूहमध्ये स्थितः पांडवान् प्रति युद्धं कर्तुम् ॥ ६ ॥ रथश्रेष्ठ अलंबुषः, महारथः श्रुतायुश्च सर्वसैन्यानां व्यूहस्य पृष्ठतः दंशितौ स्थितौ ॥ ७ ॥ हे भारत ! तावकाः तव संबंधिनः एवं च तं व्यूहं कृत्वा सन्नद्धा सिद्धाः समदृश्यन्त यथा प्रतपन्तोऽग्नयः ॥ ८ ॥ ततः राजा युधिष्ठिरः पांडवो भीमसेनश्च नकुलः सहदेवश्च उभौ अपि माद्रीपुत्रौ ॥ ९ ॥ सर्व सैन्यानां व्यूहस्य अग्रतः दंशिताः

रक्षिताः स्थिताः । धृष्टद्युम्नः विराटश्च महारथः सात्यकिश्च ॥१०॥ परानीक विनाशनाः शत्रुसैन्यंविनाशकाः महता सैन्येन स्थिताः । शिखण्डी विजयोऽर्जुनश्चैव घटोत्कचो राक्षसश्च ॥११॥ महाबाहुः चेकितानः, वीर्यवान् कुन्तिभोजश्च । हे महाराज ! महत्या सेनया वृताः रणे स्थिताः ॥१२॥ महेष्वासोऽभिमन्युः, महाबलो द्रुपदश्च महेष्वासो युयुधानः, वीर्यवान् युधामन्युश्च ॥ १३ ॥ केकया भ्रातरः चैव युद्धाय दंशिताः सुरक्षिताः स्थिताः । तेऽपि एवं दुर्जयं महाव्यूहं प्रतिव्यूह्य ॥ १४ ॥ शूराः पांडवाः समरे युद्धाय दंशिताः स्थिताः । तावकाः तु सहसेनाः नराधिपाः रणे यत्ताः सिद्धाः ॥ १५ ॥ हे नृप ! भीष्मं अग्रतः कृत्वा रणे पार्थान् अभ्युद्ययुः । तथैव पांडवाः, हे राजन् ! भीमेन पुरोगमाः ॥ १६ ॥ संग्रामे विजयैषिणः भीष्मं योद्धुमभीप्सन्तः । क्ष्वेडाः किलकिला शब्दाः शंखान् ऋकचान् गोविषाणिकाः ॥ १७ ॥ भेरी-मृदंग-पणवान् पुष्करान् नादयन्तः च पाण्डवाः भैरवान् रवान् नदन्तः अभ्यवर्तन्त ॥ १८ ॥ भेरीमृदंगशंखानां दुन्दुभीनां च निःस्वनैः उत्कृष्ट सिंहनादैश्च पृथग्विधैर्वल्गितैश्च ॥ १९ ॥ वयं प्रतिनदन्तः त्वरान्विताः तानगच्छाम । सहसैव अभिसंक्रुद्धा तत् महत् तुमुलं युद्धं आसीत् ॥ २० ॥ ततोऽन्योन्यं प्रधावन्तः सं प्रहारं प्रचक्रिरे । ततः महता शब्देन वसुंधरा प्रचकम्पे ॥ २१ ॥ पक्षिणश्च आकाशे महाघोरं शब्दं व्याहरन्तः विबभ्रमुः । सप्रभः प्रभया युक्तः उदितः सूर्यः निष्प्रभः समपद्यत ॥ २२ ॥ सुमहद्भयं शंसन्तः तमुला वाता ववुः । घोरनिर्हादाः घोरशब्दाः घोराः शिवाः तत्र ववाशिरे ॥२३॥ हे महाराज ! महद् वैशसं आगतं वेदयन्तः । हे राजन् ! प्रज्वलिताः दिशः पांसुवर्षं च पपात ॥ २४ ॥ रुधिरेण समुन्मिश्रं तथैव च अस्थिवर्षं । रुदतां वाहनानां च नेत्रेभ्यः जलं प्रापतत् ॥ २५ ॥

समासाः

१ व्यूहमध्यं = व्यूहस्य मध्यं ।
२ परानीकविनाशनः = परस्य अनीकं । तस्य विनाशनः ।
३ विजयैषिन् = विजयं इच्छति ।
४ भेरीमृदंगपणवान् = भेरी च मृदंगश्च पणवश्च ।
५ उत्कृष्टसिंहनादः = उत्कृष्टश्चासौ सिंहनादश्च ।
६ सप्रभः = प्रभया सहितः ।
७ निष्प्रभः = निर्गता प्रभा यस्यात् ।
८ घोरनिर्हादः = घोरः निर्हादः यस्य ।
९ पांसुवर्षं = पांसूनां वर्षं ।

शब्द ।

पक्षः = विभाग, बाजू
दंशित = रक्षित
सन्नद्ध = सिद्ध
अनीक = सैन्य
पर = शत्रु
घोरनिर्हादाः = बडेशब्दवाले
वैशसं = भय
अस्थि = हड्डी

महेष्वासः = बडा धनुषधारी
अभ्युद्ययुः = हमला किया
अभीप्सन् = इच्छा करनेवाला
वल्गित = शब्द; भाषण
क्ष्वेडा = गर्जना
शिवा = गीदड, सियार
पांसु = धुली
वर्षं = वृष्टि

पाठ ७

रुद्र.

रुद्र शब्द के अर्थ भी पूर्ववत् अनेक प्रकारके होते हैं। ये अर्थ अब इस पाठमें देखिये—

रोदिति इति रुद्रः।

रोता है इसलिये इसको रुद्र कहते हैं। जो बहुत बुरे कर्म करता है और उनका बुरा फल भोगनेके प्रसंगमें रोता है उसका नाम रुद्र है।चोर, दुष्ट इस अर्थसे रुद्र हैं। तथा—

रोदयति इति रुद्रः।

जो रुलाता है उसका नाम रुद्र है। बुरे कर्म करने वालों को कठोर दण्ड देकर जो रुलाता है उसको रुद्र कहते हैं, परमेश्वर न्यायाधीश आदि सब इस अर्थ से रुद्र हैं।

रु+द्र

(रु) शब्दका (द्र) भेदन करने वाला रुद्र कहलाता है। शब्द को व्यक्त स्थितिमें प्रकट करनेवाला रुद्र है।

रुत्+रा=रुद्र

(रुत्) शब्दको (रा) देनेवाला जो है, जो शब्दका प्रेरक देव है उसका नाम रुद्र है। शब्दका प्रेरक आत्मा, परमात्मा, मेघस्थानीय विद्युत्, वक्ता आदि है। ये सब इस कारण रुद्र की विभूतियां समजो जाती हैं।

इस रीतिसे ये भिन्न भिन्न व्युत्पत्तियां देखकर पाठक रुद्र देवताके मंत्र पढेंगे तो उनको बडा बोध मिल सकता है। यहां कुछ मंत्र नमूनेके तौर पर दिये जाते हैं—

या ते रुद्र शिवा तनूरघोरा पापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताऽभिचाकशीहि ॥
यजु. १६। १

"हे (रुद्र) रुद्र! (या) जो (ते) तेरा (पापकाशिनी) पापनाशक (अ-घोरा तनूः) क्रूरतारहित शरीर है। हे (गिरि-शन्त) वाकशक्ति द्वारा सुख को फैलाने वाले देव! (तया शन्तमया) उस सुख फैलानेवाले (तन्वा) शरीरसे (नः) हम सबको (अभिचाकशीहि) देख, सुखी कर॥"

इस मंत्रमें "गिरिशन्त" शब्द बहुत विचार करने योग्य है— (गिरि) वाणीमें रह कर जो (शं+त) सुख फैलाता है, उसको "गिरिशन्त" कहते हैं। वाणीके अंदर आत्मा की शक्ति है और वह ही सच्चा सुख देनेवाली है, इत्यादि भाव यहां देखने योग्य है।

असौ यस्ताम्रो अरुण उत बभ्रुः सुमंगलः।
ये चैनं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषां हेड ईमहे॥
य० १६। ६

(यः असौ) जो यह (ताम्रः अरुणः उत बभ्रुः सुमंगलः) लाल, अरुणवर्णका, तथा भूरे वर्णवाला मंगल करने वाला रुद्र है (ये) जो (सहस्रशः रुद्राः अभितः दिक्षु एनं श्रिताः) हजारों दूसरे रुद्र चारों ओरसे दिशाओंमें इसके आश्रयसे रहते हैं (एषां हेडः अव ईमहे) इनका क्रोध हम भक्तिद्वारा दूर करते हैं।

एक रुद्र सबको आधार देनेवाला मुख्य है और उसके आधार से अनेक हजारों रुद्र रहते हैं। मुख्य का नाम भी रुद्र है और उसके आधार से रहने वालोंका नाम भी रुद्र ही है। यहां यह वर्णन समझनेके लिये एक परमात्माके आधार

से रहने वाले अनेक जीवात्मा, एक सेनापतिके आश्रयसे रहने वाले हजारों सैनिक, एक राजाके आश्रयसे रहने वाले हजारों राजपुरुष आदि एक के आधारसे रहने वाले अनेकों का संबंध यहां देखने योग्य है। रुलाने वाला रुद्र होता है, राजा दुष्टोंको दण्ड देकर रुलाता है इस लिये वह रुद्र है, उक्त कारण ही राजपुरुष भी रुद्रही हैं। इनके क्रोधसे अपने आपको बचानेका यत्न हरएक करें। इसी अध्यायमें—

नमो हिरण्यबाहवे सेनान्ये ॥ १६। १७
नमो रुद्रायाततायिने क्षेत्राणां पतये नमः।
नमः सूतायाहन्त्यै वनानां पतये नमः॥ १६। १८
नमो मंत्रिणे वाणिजाय कक्षाणां पतये नमः।
नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः।

य० १६। १९

(हिरण्य बाहवे सेनान्ये) बाहूपर सोनेके भूषण धारण करने वाले सेना चलानेवाले के लिये नमस्कार है, (आततायिने) धनुष्य तनाकर खींचने वाले के लिये तथा (क्षेत्राणां पतये) देशोंके स्वामीके लिये नमस्कार है। (मंत्रिणे) मंत्री तथा (वाणिजाय) बनियेके लिये और (कक्षाणां पतये) बगलोंके अधिपतियोंके लिये तथा (उच्चैः घोषाय आक्रन्दयते) बडे आवाजसे घोषणा करने वाले तथा (पत्तीनां पतये) पदाति सैनिकोंके स्वामी रूपी रुद्र के लिये नमस्कार है।

ये सब राजपुरुष यहां रुद्रके स्वरूप हैं। ये दुष्टोंको रुलाते हैं इसलिये इनको रुद्र कहा है। यहां का "वाणिज" शब्द व्यापार विभाग का राजाधिकारी पूर्वापर संबंधसे ज्ञात होता है, क्योंकि इसकी गिनती राजाधिकारियों में की है। ये सब रुद्र ही हैं। पाठक पूर्वस्थान में दिये अर्थ यहां कैसे संगत होते हैं

यह देखें और रुद्र का अर्थ समझ लें.

जनताको रुलानेवाले तो चोर डाकु आदिभी होते हैं इसलिये ये भी रुद्र ही हैं देखिये इनका वर्णन—

स्तेनानां पतये नमः ॥ य० १६ । २०

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमः ।
नमो निषंगिण इषुधिमते तस्कराणां पतये नमः ॥
नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णतां पतये नमः ॥
नमोऽसिमद्भ्यो नक्तंचरद्भ्यो विकृन्तानां पतये नमः ।

य० १६ । २१

(स्तेनानां पतये) चोरोंके स्वामीके लिये (नमः) शस्त्र या दण्ड दिया जावे । (वञ्चते, परिवञ्चते स्तायूनां पतये) ठगाने वाले, सब प्रकारसे ठगाने वाले, लुटेरोंके स्वामीके लिये दंड दिया जावे । (निषंगिणे इषुधिमते तस्कराणां पतये नमः) खड्ग धारण करने वाले. बाण धारी चोरोंके स्वामी के लिये दण्ड दिया जावे । (सृकायिभ्यः जिघांसद्भ्यः मुष्णतां पतये नमः) शस्त्र-धारी घातपात करनेवाले डाकुओंके स्वामीके लिये दण्ड दिया जावे । (असिमद्भ्यः नक्तं चरद्भ्यः विकृन्तानां पतये नमः) तलवार धारी, रात्रीके समय घूमने वाले और काटने वालों के मुखियाके लिये दण्ड दिया जावे ।

इन मंत्रोंमें जो स्तेन आदि शब्द हैं वे सब रुद्रोंके ही रूप हैं । ये रुद्र जनताको रुलाते हैं यह बात सब जान सकते हैं । चोर डाकू खूनी लुटेरे ये जनताको कितने सताते हैं यह सब जानते ही हैं । ये रुलाते हैं इसी लिये ये रुद्र हैं । पाठक यहां विचार करके देखें कि राजा और राजपुरुष दुष्टोंको रुलाते इस कारण ही रुद्र हैं और ये चोर आदि जनताको रुलाते हैं इस कारण रुद्र हैं । दोनों में रुलानेका धर्म समान है । परंतु

" नमः " शब्द के अर्थमें भेद है। " नमः " शब्द के अर्थ— "नमन. वज्र, शस्त्र, दण्ड, मेघकी विद्युत्" आदि हैं। वज्र, शस्त्र और दण्ड ये शत्रुको तथा दुष्टों को नमाते हैं इसलिये इनका नाम " नमः" है। यहां भी पाठक नमः का यौगिक अर्थ ही देखें। नमः शब्दका यह अर्थ वैदिक कोश निघण्टूमें दिया है। वज्र के अंदर ही दुष्टोंको नम्र बनाने का सामर्थ्य है इसलिये वज्रका नाम नमः है। यह अर्थ लेकर उक्त मंत्र भागमें नमः का अर्थ शस्त्र या दण्ड किया है।

रुद्र नाम परमात्माका है क्यों कि वह दुष्टोंको रुलाता है, फिर रुद्रों के रूपोंमें " चोर " कि स प्रकार आगये हैं, यह शंका यहां पाठकोंके मनमें उत्पन्न हो सकती है, इसका समाधान बडे लंबे लेख से दिया जा सकता है, परंतु अतिसंक्षेपसें यहां इस का समाधान किया जाता है, पाठक उसका विचार करें—

परमात्मा हृदयकी गुहामें छिपा रहता है, चोर भी पहाड की गुहामें छिपा रहता हे, कितना भी ढूंढा जाय तो भी परमात्मा प्रत्यक्ष नहीं होता, उसी प्रकार प्रवीण चोर भी प्रत्यक्ष नहीं होता। जिस प्रकार चोर न समझते हुए धन का अपहार करता है, ठीक उसी प्रकार परमेश्वर भी जिस बुरे मनुष्यका धन हरना चाहता है न समझते हुए उसका धन हरण करता है। इस प्रकार यदि समानता कविकी दृष्टीसे देखी जाय तो पाठकोंको पता लग जायगा कि इनमें समानता कहां है और विषमता कहां है। यह बडा गूढ विषय है इसलिये इस समय समझमें आना कठिन है जो आगे स्वयं खुल जायगा।

पाठ ८

महाभारतम् । (भीष्मपर्व. अ. १००)

सञ्जय उवाच ।

अभिमन्यूरथोदारः पिशङ्गैस्तुरगोत्तमैः ।
अभिदुद्राव तेजस्वी दुर्योधनबलं महत् ॥ १ ॥
विकिरञ्शरवर्षाणि वारिधारा इवाऽम्बुदः ।
न शेकुः समरे क्रुद्धं सौभद्रमरिसूदनम् ॥ २ ॥
शस्त्रौघिणं गाहमानं सेनासागरमक्षयम् ।
निवारयितुमप्याजौ त्वदीयाः कुरुनन्दन ॥ ३ ॥
तेन मुक्ता रणे राजञ्शराः शत्रुनिबर्हणाः ।
क्षत्रियाननयञ्शरान्प्रेतराजनिवेशनम् ॥ ४ ॥
यमदण्डोपमान्घोराञ्ज्वलिताशीविषोपमान् ।
सौभद्रः समरे क्रुद्धः प्रेषयामास सायकान् ॥ ५ ॥
स रथान्रथिनस्तूर्णं हयांश्चैव ससादिनः ।
गजारोहांश्च सगजान्दारयामास फाल्गुनिः ॥ ६ ॥
तस्य तत्कुर्वतः कर्म महत्संख्ये महीभृतः ।
पूजयाञ्चक्रिरे हृष्टाः प्रशशंसुश्च फाल्गुनिम् ॥ ७ ॥
तान्यनीकानि सौभद्रो द्रावयामास भारत ।
तूल राशीनिवाकाशे मारुतः सर्वतो दिशम् ॥ ८ ॥
तेन विद्राव्यमाणानि तव सैन्यानि भारत ।
त्रातारं नाध्यगच्छन्त पङ्के मग्ना इव द्विपाः ॥ ९ ॥
विद्राव्य सर्वं सैन्यानि तावकानि नरोत्तम ।
अभिमन्युः स्थितो राजन्विधूमोऽग्निरिव ज्वलन्॥ १० ॥
न चैनं तावका राजन्विषेहुररिघातिनम् ।
प्रदीप्तं पावकं यद्वत्पतङ्गाः कालचोदिताः ॥ ११ ॥

प्रहरन्सर्वशत्रुभ्यः पाण्डवानां महारथः ।
अदृश्यत महेष्वासः सवज्र इव वासवः ॥ १२ ॥
हेमपृष्ठं धनुश्चास्य ददृशे विचरद्दिशः ।
तोयदेषु यथा राजन्राजमानाः शतह्रदा ॥ १३ ॥
शराश्च निशिताः पीता निश्चरन्ति स्म संयुगे ।
वनात्फुल्लद्रुमाद्राजन्भ्रमराणामिव व्रजाः ॥ १४ ॥
तथैव चरतस्तस्य सौभद्रस्य महात्मनः ।
रथेन काञ्चनाङ्गेन ददृशुर्नान्तरं जनाः ॥ १५ ॥
मोहयित्वा कृपं द्रोणं द्रौणिं च सबृहद्बलम् ।
सैन्धवं च महेष्वासो व्यचरल्लघु सुष्ठु च ॥ १६ ॥
मण्डलीकृतमेवास्य धनुः पश्याम भारत ।
सूर्यमण्डल संकाशं दहतस्तव वाहिनीम् ॥ १७ ॥
तं दृष्ट्वा क्षत्रियाः शूराः पतपन्तं तरस्विनम् ।
द्विफाल्गुनमिमं लोकं मेनिरे तस्य कर्मभिः ॥ १८ ॥
तेनार्दिता महाराज भारती सा महाचमूः ।
व्यभ्रमत्तत्र तत्रैव योषिन्मदवशादिव ॥ १९ ॥
द्रावयित्वा महासैन्यं कम्पयित्वा महारथान् ।
नन्दयामास सुहृदो मयं जित्वेव वासवः ॥ २० ॥
तेन विद्राव्यमाणानि तव सैन्यानि संयुगे ।
चक्रुरार्तस्वनं घोरं तव सैन्यस्य भारत ॥ २१ ॥
मारुतोद्धतवेगस्य सागरस्येव पर्वणि ।
दुर्योधनस्तदा राजन्नार्ष्यशृङ्गिमभाषत ॥ २२ ॥

सञ्जय उवाच-- तेजस्वी रथोदारो रथश्रेष्ठ अभिमन्युः पिशंगैस्तुरगोत्तमैः महत् दुर्योधनबलं अभिदुद्राव ॥ १ ॥ अम्बुदा वारिधारा इव शरवर्षाणि विकिरन् । अरिसूदनं शत्रुनाशकं सौभद्रं सुभद्रापुत्रं अभिमन्युं समरे क्रुद्धं न शेकुः ॥ २ ॥ हे कुरुनंदन!

त्वदीयाः त्वत्पक्षीयाः अक्षयं सेनासागरं गाहमानं शस्त्रौघिणं अभिमन्युं आजौ युद्धे निवारयितुं अपि न शेकुः ॥ ३ ॥ हे राजन्! तेन अभिमन्युना रणे मुक्ताः शत्रुनिबर्हणाः शत्रुनाशकाः शराः बाणाः शूरान् क्षत्रियान् प्रेतराजनिवेशनं यमसदनं अनयन् ॥ ४ ॥ समरे क्रुद्धः सौभद्रः आशीविषोपमान् यमदण्डोपमान् घोरान् ज्वलितान् सायकान् बाणान् प्रेषयामास ॥ ५ ॥ स फाल्गुनिः फाल्गुनस्य अर्जुनस्य पुत्रः तूर्णं सत्वरं सरथान् रथिनः, ससादिनो हयान्, सगजान् गजारोहान् च दारयामास ॥ ६ ॥ तस्य तन्महत्कर्म संख्ये युद्धे कुर्वतः हृष्टा महीभृतो राजानः फाल्गुनिं अभिमन्युं पूजयांचक्रिरे तं प्रशशंसुश्च ॥ ७ ॥ हे भारत! सौभद्रः तानि अनीकानि सर्वतो दिशं द्रावयामास, मारुतः तूलराशीन् आकाशे इव ॥ ८ ॥ हे भारत! तेन विद्राव्यमाणानि तव सैन्यानि, पंके कर्दमे मग्ना द्विपाः गजा इव, त्रातारं नाध्यगच्छन्त न जानन्त ॥ ९ ॥ हे नरोत्तम! तावकानि सर्व सैन्यानि विद्राव्य, हे राजन्! विधूमोऽग्निरिव ज्वलन्, अभिमन्युः स्थितः ॥ १० ॥ हेराजन्! एनं अरिघातिनं अभिमन्युं तावका वीराः न विषेहुः। कालचोदिताः कालप्रेरिताः पतंगा यद्वत् प्रदीप्तं पावकं ॥ ११ ॥ पांडवानां महारथः महेष्वासः अभिमन्युः सर्वशत्रुभ्यः प्रहरन् सवज्र वासव इंद्र इव अदृश्यत ॥ १२ ॥ हे राजन्! अस्य हेमपृष्ठं धनुः दिशः विचरत् ददृशे। यथा तोयदेषु मेघेषु शतह्रदा विद्युत् राजमाना ॥ १३ ॥ हेराजन्! निशिताः पीताः शराः संयुगे युद्धे निश्चरन्ति स्म। फुल्लद्रमात् वनात् भ्रमराणां व्रजा इव॥ १४ ॥ तथैव तस्य महात्मनः सौभद्रस्य चरतः काञ्चनांगेन रथेन अन्तरं जना न ददृशुः ॥१५॥ कृपं द्रौणिं अश्वत्थामानं, सबृहद्बलं बृहद्बलेन सहितं सैन्धवं सिंधुराजानं मोहयित्वा महेष्वासो महाधनुर्धारी लघु सुष्ठु च व्यचरत् ॥ १६ ॥ हे भारत! अस्य तव वाहिनीं

दहतः धनुः मंडलीकृतं सूर्यमंडलसंकाशं एव पश्याम ॥ १७ ॥ शूराः क्षत्रियाः तं तरस्विनं प्रतपन्तं दृष्ट्वा, तस्य कर्मभिः इमं लोकं भलोकं द्विफालुनं मेनिरे ॥ १८ ॥ हे महाराज ! सा भारती महाचमूः तेन अर्दिता । मदवशा योषिदिव तत्र तत्रैव व्यभ्रमत् ॥ १९ ॥ महासैन्यं द्रावयित्वा महारथान् कंपयित्वा, सुहृदः नंदयामास, वासव इन्द्रो मयं जित्वा इव ॥ २० ॥ हे भारत ! तेन तव सैन्यानि संयुगे विद्राव्यमाणानि तव सैन्यस्य घोरं आर्तस्वनं चक्रुः ॥ २१ ॥ मारुतोद्धतवेगस्य सागरस्य पर्वणि इव, हे राजन् ! तदा दुर्योधनः आर्ष्यशृंगिं अलंबुषं राक्षसमभाषत ॥ २२ ॥

समासाः ।

१ तुरगोत्तमः = तुरगेषु उत्तमः ।
२ दुर्योधनबलं = दुर्योधनस्य बलम् ।
३ शरवर्षं = शराणां वर्षम् ।
४ सेनासागरः = सेना एव सागरः।
५ प्रेतराजनिवेशनम्= प्रेतानां राजा । तस्य निवेशनम् ।
६ यमदण्डोपमः = यमस्य दण्डः । तस्य उपमा यस्मै ।
७ विधूमः = विगतः धूमः यस्मात् ।
८ फुल्लद्रुमं = फुलाः द्रुमा यस्मिन् ।
९ मारुतोद्धतवेगः = मारुतेन उद्धतः । उद्धतः वेगः यस्य ।

शब्द ।

तुरगः = घोडा
अम्बुदः = मेघ
तोयदः = ,,
जलदः = ,,
गाहमान = तैरनेवाला
वाहिनी = सेना

प्रेतराज = यम
तूल = कपास
पंक = कीचड
द्विप = हाथी
कांचनं = सुवर्ण, सोना
योषित = स्त्री

पाठ ९

औषधि.

इस पाठमें वैदिक शब्द की एक विशेषता बतानी है। कई शब्दों के प्रथमाक्षर लुप्त हो जाते हैं। यह औषधि या ओषधि शब्द वास्तवमें "दोषधि" है, इसके प्रथम स्थानके दकार का लोप होकर दोषधि का ओषधि बनता है। इसका अर्थ-

दोष+धि = दोषोंको धोनेवाली

ऐसा होता है। शरीरके अंदर जितने दोष, रोगबीज अथवा आयु क्षीण करने वाले कारण होते हैं, उन सब दोषोंको धोकर शुद्ध करने वाली वनस्पति होने के कारण उसको वास्तवमें "दोष +धि" कहना चाहिये परंतु "ओषधि" कहते हैं। अब इसके मंत्र देखिये—

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।
मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥ ७५ ॥

यजु० १२। ७५

(याः ओषधीः) जो औषधियां (देवेभ्यः) देवोंसे (त्रि युगं पुरा पूर्वा जाता) तीन युग पहिले उत्पन्न हुई थी, उन (बभ्रूणां) भरण पोषण करनेवाली औषधियोंके (शतं सप्त च धामानि) सौ और सात धाम हैं ऐसा मैं (मनै नु) मानता हूं।

शतं वो अम्ब धामानि सहस्रमुत वो रुहः।
अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥ ७६ ॥

हे (अम्ब) रक्षक औषधि! (वः शतं धामानि) आपके सौ धाम हैं (उत वः रुहः सहस्रं) और आपके अंकुर हजारों हैं।

(अथा) तथा (यूयं शतक्रत्वः) आप सौ कर्म करनेवाली बन कर (इमं मे अगदं कृत) इस मेरे रोगीको नीरोग बना दो ।

ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ ७७ ॥

(पुष्पवतीः) फूलवाली (प्र सूवरीः) सुख देने वाली औषधियां (वीरुधः) वनस्पतियां (पारयिष्णवः) रोगोंके पार पहुंचाने वाली हैं, ये (अश्वा इव सजित्वरीः) घोडों के समान वेगवान अर्थात् अपना कार्य करनेमें पूर्ण समर्थ हैं, इन से (प्रतिमोदध्वम्) आनंदित होओ ॥

ओषधीरितिमातरस्तद्वो देवीरुप ब्रुवे ।
सनेयमश्वं गां वास आत्मानं तव पूरुषः ॥ ७८ ॥

औषधियां (मातरः) माताएँ हैं, हे (देवीः) दिव्य औषधियों! तथा हे पुरुष! (तत् वः उपब्रुवे) वह आपसे मैं कहता हूं कि (अश्वं, गां, वासः, आत्मानं) घोडा, गाय, वस्त्र तथा अपने आत्माको (सनेयं) निरोग होकर मैं प्राप्त करूं ॥

यत्रौषधीः समग्मत राजानः समितावि व ।
विप्रः स उच्यते भिषग्रक्षोहाऽमीवचातनः ॥ ८० ॥

(राजानः समितौ इव) राजा लोग जैसे युद्धोंमें जाते हैं उस प्रकार (यत्र औषधीः समग्मत) जहां औषधियां इकट्ठी होती हैं (सः विप्रः भिषक् उच्यते) उसी विप्रको वैद्य कहते हैं वह (अमीवचातनः, रक्षो-हा) रोगोंका दूर करनेवाला है और रोगबीजों का भी नाश करता है ।

इदिमा वाजयन्नहमोषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ८५ ॥

(अहं यत् इमाः ओषधीः) मैं यदि ये औषधियां (वाजयन् हस्त आदधे) बल बढाता हुआ हाथ में पकडूं तो (यक्ष्मस्य आत्मा नश्यति) रोगकी जड नष्ट हो जाती है (यथा पुरा जीवगृभः) जिस प्रकार पहिले रोगसे पकडा हुआ प्राणी नष्ट होत है॥

यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः।
ततो यक्ष्मं वि बाधस्व उग्रो मध्यमशीरिव॥ ८६॥

हे औषधियो! (यस्य अंगं अंगं परुः परुः) जिसके अंग अंगमें और जोड जोडमें तुम (प्रसर्पथ) जाती हो (ततः यक्ष्मं वि बाधस्व) उसके बाद तुम रोग को प्रतिबंध करती हो जैसे (उग्रः) क्षत्रिय (मध्यमशीः इव) बीचके मर्मोंको काटता है॥

याः फलिनीर्या अफला याश्च पुष्पिणाः।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः॥ ८९॥

(याः फलिनीः) जो फल वाली, (या अपलाः) जो फल रहित और (याः च पुष्पिणीः) जो फूलवाली औषधियां हैं (ताः बृहस्पतिप्रसूताः) वे ज्ञानी के द्वारा दिये जानेपर (नः अंहसः मुञ्चन्तु) हमें पापरूपी रोगोंसे बचावें॥

या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः।
तासामसि त्वमुत्तमारं कामाय शं हृदे॥ ९२॥

जो औषधियां (सोम-राज्ञीः) जिनका राजा सोम है और जो (बह्वीः शतविचक्षणाः) बहुत सौ प्रकारके शुभगुणोंसे युक्त हैं। (तासां त्वं उत्तमा असि।) उनमें तू उत्तम है (कामाय अरं) ईप्सित कार्यके लिये पर्याप्त और (हृदे शं) हृदयके लिये आनंद-दायक है।

या ओषधीः सोमराज्ञीर्विष्ठिता पृथिवीमनु।
बृहस्पतिप्रसूता अस्यै संधत्त वीर्यम् ॥ ९३ ॥

जो सोम राजाके राज्यमें रहनेवाली औषधियां पृथ्वीपर (अनु-वि- स्थिताः) आकर रही हैं। वे (बृहस्पति- प्रसूताः) विद्वान् द्वारा दियी जानेपर (अस्यै वीर्यं संधत्त) इसके लिये वीर्य धारण करें ॥

ओषधयः समवदन्त सोमेन सह राज्ञा।
यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि ॥ ९६ ॥

सोम राजा के साथ औषधियां बोलती हैं कि जिसके लिये ब्राह्मण हमें देता है, हे राजन् ! (तं पारयामसि) उसे हम पार ले जाती हैं।

नाशयित्री बलासस्यार्शस उपचितामसि।
अथो शतस्य यक्ष्मणां पाकारोरसि नाशनी ॥ ९७ ॥

(बलासस्य) कफ , (अर्शसः) बवासीर, (उपचितां) सूजन आदिकी (नाशयित्री असि) नाश करनेवाली तू है। (अथो) और (यक्ष्मणां शतस्य) रोगोंके सैंकडों भेदोंका तथा(पाकारोः) पककर होनेवाले रोगोंकी (नाशनी असि) नाश करनेवाली तू है॥

इस प्रकार औषधि प्रकरण का पाठक अभ्यास कर सकते हैं।

पाठ १०

(महाभारत उद्योग. अ. ३३)

विदुर उवाच ।

राजा लक्षणसंपन्नस्त्रैलोक्यस्याधिपो भवेत् ।
प्रेष्यस्ते प्रेषितश्चैव धृतराष्ट्र युधिष्ठिरः ॥ १६ ॥

विपरीततरश्च त्वं भागधेये न संमतः ।
अर्चिषां प्रक्षयाच्चैव धर्मात्मा धर्मकोविदः ॥ १७ ॥

आनृशंस्यादनुक्रोशाद्धर्मात्सत्यात्पराक्रमात् ।
गुरुत्वात्त्वयि संप्रेक्ष्य बहून्क्लेशांस्तितिक्षते ॥ १८ ॥

दुर्योधने सौबले च कर्णे दुःशासने तथा ।
एतेष्वश्वैर्यमाधाय कथं त्वं भूतिमिच्छसि ॥ १९ ॥

आत्मज्ञानं समारंभस्तितिक्षा धर्मनित्यता ।
यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ॥ २० ॥

निषेवते प्रशस्तानि निंदितानि न सेवते ।
अनास्तिकः श्रद्दधानः एतत्पंडितलक्षणम् ॥ २१ ॥

क्रोधो हर्षश्च दर्पश्च ह्रीस्तंभो मान्यमानिता ।
यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ॥ २२ ॥

यस्य कृत्यं न जानन्ति मंत्रं वा मंत्रितं परे ।
कृतमेवास्य जानन्ति स वै पण्डित उच्यते ॥ २३ ॥

यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रतिः ।
समृद्धिरसमृद्धिर्वा स वै पंडित उच्यते ॥ २४ ॥

यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते ।
कामादर्थं वृणीते यः स वै पण्डित उच्यते ॥ २५ ॥

यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्वते ।
न किंचिदव मन्यन्ते नराः पण्डितबुद्धयः ॥ २६ ॥

निश्चित्य यः प्रक्रमते नान्तर्वसति कर्मणः ।
अवंध्यकालो वश्यात्मा स वै पण्डित उच्यते ॥ २७ ॥

आर्यकर्माणि रज्यन्ते भूतिकर्माणि कुर्वते ॥
हितं न चाभ्यसूयन्ति पण्डिता भरतर्षभ ॥ २८ ॥

न हृष्यत्यात्मसंमाने नावमानेन तप्यते ।
गांगो ह्रद इवाऽक्षोभ्यो यः स पण्डित उच्यते ॥ २९ ॥

तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां नरः पण्डित उच्यते ॥ ३० ॥

श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा ।
असंभिन्नार्यमर्यादः पण्डिताख्यां लभेत सः ॥ ३१ ॥

अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः ।
अर्थांश्चाकर्मणा प्रेप्सुर्मूढ इत्युच्यते बुधैः ॥ ३२ ॥

स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।
मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते ॥ ३३ ॥

अकामान्कामयति यः कामयानान्परित्यजेत् ।
बलवन्तं च यो द्वेष्टि तमाहुर्मूढचेतसम् ॥ ३४ ॥

अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥ ३५ ॥

संसारयति कृत्यानि सर्वत्र विचिकित्सते ।
चिरं करोति क्षिप्रार्थे स मूढो भरतर्षभ ॥ ३६ ॥

श्राद्धं पितृभ्यो न ददाति दैवतानि न चार्चति ।
सुहृन्मित्रं न लभते तमाहुर्मूढचेतसम् ॥ ३७॥

अनाहूतः प्रविशति अपृष्टो बहुभाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ ३८ ॥

परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च क्रुध्यत्यनीशानः स च मूढतमो नरः ॥ ३९ ॥

आत्मनो बलमज्ञाय धर्मार्थपरिवर्जितम् ।
अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते ॥ ४० ॥

अशिष्यं शास्ति यो राजन्यश्च शून्यमुपासते ।
कदर्यं भजते यश्च तमाहुर्मूढचेतसम् ॥ ४१ ॥

अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा ।
विचरत्यसमुन्नद्धो यः स पण्डित उच्यते ॥ ४२ ॥

एकः संपन्नमश्नाति वस्ते वासश्च शोभनम् ।
योऽसंविभज्य भृत्येभ्यः को नृशंसस्ततस्ततः ॥ ४३ ॥

एकः पापानि कुरुते फलं भुक्ते महाजनः ।
भोक्तारो विप्रमुच्यन्ते कर्ता दोषेण लिप्यते ॥ ४४ ॥

एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकम् ॥ ४५॥

एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते ।
सराष्ट्रं सप्रजं हन्ति राजानं मंत्रविप्लवः ॥ ४६ ॥

एकः स्वादु न भुञ्जीत एकश्चार्थान्न चिंतयेत् ।
एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात् ॥ ४७॥

एकमेवाऽ द्वितीयं तद्यद्राजन्नावबुध्यसे ।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ॥ ४८॥

एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ १९ ॥

सोऽस्य दोषो न मन्तव्यः क्षमा हि परमं बलम् ;
क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ॥ ५० ॥

क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते ।
शान्ति खड्गः करे यस्य किं करिष्यति दुर्जनः।। ५१ ॥

अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ।
अक्षमावान्परं दोषैरात्मानं चैव योजयेत् ॥ ५२ ॥

एको धर्मः परं श्रेयः क्षमैका शांतिरुत्तमा ।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥ ५३ ॥

द्वाविमौ ग्रसते भूमिः सर्पो बिलशयानिव ।
राजानं चाविरोद्धारं ब्राह्मणं चाऽप्रवासिनम् ॥ ५४ ॥

द्वे कर्मणी नरः कुर्वन्नस्मिल्लोके विरोचते ।
अब्रुवन्परुषं किंचिदसतोऽ नर्चयंस्तथा ॥ ५५ ॥

—०—

पाठ ११

[१]

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति ।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ॥१॥

अथर्ववेद. १२।१।१

(सत्यं) सत्य, (बृहत्) वृद्धि, (ऋतं) न्याय्य व्यवहार, (उग्रं) क्षात्रतेज, (दीक्षा) दक्षता, (तपः) तप, द्वंद्व सहन करने की शक्ति, (ब्रह्म) ज्ञान, (यज्ञः) शुभकर्म ये गुण (पृथिवीं धारयन्ति) मातृभूमिका धारण करते हैं। (सा नः पृथ्वी) वह हमारी मातृभूमि हमारे (भूतस्य भव्यस्य पत्नी) भूत भविष्य की पालन कर्त्री है वह (नः ऊरुं लोकं कृणोतु) हमारे लिये विस्तृत स्थान करे । अर्थात् हमें विस्तृत स्थान देवे ।

[२]

असंबाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु ।
नाना वीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ॥२॥

(यस्याः मानवानां मध्यतः) जिस मातृभूमिके मनुष्योंके अंदर (उद् वतः , प्र वतः, समं बहु अ-संबाधं) उच्चता और नीचता तथा समता के विषयमें बहुत ही निर्वैरता है और (या नाना-वीर्या ओषधीः बिभर्ति) नाना प्रकारके वीर्योंसे युक्त औषधियोंको धारण पोषण करती है वह (नः पृथिवी) हमारी मातृभूमि (नः प्रथतां राध्यतां) हमारी कीर्तिका साधन करे ।। अर्थात् इस मातृभूमिके कारण हमारी प्रसिद्धि होवे ।

[३]

यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः।
या बिभर्ति बहुधा प्राणदेजत्सा नो भूमिर्गोष्वप्यन्ने दधातु॥ ४॥

(यस्याः पृथिव्याः चतस्रः प्रदिशः) जिस मातृभूमिकी चारों दिशाओंमें (कृष्टयः) विविध खेतियां (यस्यां अन्नं संबभूवुः) जिसमें अन्नको उत्पन्न करती हैं। और उससे (या) जो भूमि (एजत् प्राणत् बहुधा बिभर्ति) घूमने फिरनेवाले प्राणिमात्र को बहुत प्रकारसे पुष्ट करती है (सा नो भूमिः) वह हमारी मातृ-भूमि हमें (गोषु अन्ने अपि दधातु)गौओंमें तथा अन्नमें भी धारण करें।

[४]

यस्यां पूर्वे पूर्वजना वि चक्रिरे यस्यां देवा असुरानभ्यवर्तयन्।
गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु॥ ५॥

(यस्यां पूर्वे पूर्वजना विचक्रिरे) जिसमें हमारे प्राचीन पूर्वजोंने विविध पराक्रम किये थे, (यस्यां देवाः असुरान् अभ्यवर्तयन्) जिस मातृभूमिमें देवोंने असुरोंको हराया था, तथा जो (गवां अश्वानां वयसः च विष्ठाः) जो गौवैं घोडे और कौवेआदि पक्षिओं को विशेष स्थान देती है, वह (नः पृथिवी) हमारी मातृभूमि हमें (भगं वर्चः दधातु) ऐश्वर्य और तेज देवे॥

[५]

यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम् ।
सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा ॥ ७ ॥

(विश्वदानीं यां भूमिं पृथिवीं) सब कुछ देनेवाली जिस विस्तृत मातृभूमि की (अ-स्वप्नाः देवाः) सुस्ती न करनेवाले देव (अ-प्रमादं रक्षन्ति) प्रमादरहित होकर रक्षा करते हैं (सा नः प्रिये मधु दुहां) वह हमको मीठे मधुर पदार्थ देती रहे (अथो वर्चसा उक्षतु) और तेजके साथ हमें बढावे ॥

[६]

यो नो द्वेषत् पृथिवि यः पृतन्याद्योऽभिदासान्मनसा यो वधेन ।
तं नो भूमे रंधय पूर्वकृत्वरि ॥ १४ ॥

हे (पृथिवि) मातृभूमि ! (यः नः द्वेषत्) जो हम सब का द्वेष करे (यः पृतन्यात्) जो हमारे ऊपर सेना चलावे, (यः मनसा अभिदासात्) जो मनसे हमें दास बनानेका विचार करे, तथा (यः वधेन) जो वधसे हमारा नाश करनेका यत्न करे, हे (पूर्व-कृत्वरि) पूर्ण कर्मोंमें कुशल (नः भूमे) हमारी मातृभूमि ! तू (तं रंधय) उसका पूर्ण नाश कर ।

[७]

त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः। तवेमे पृथिवि पंच मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो रश्मिभिरातनोति ॥ १५ ॥

हे (पृथिवि) मातृभूमि! (ये मर्त्याः त्वज्जाताः) जो हम सब मनुष्य तुझसे ही उत्पन्न हुए हैं और (त्वयि चरन्ति) तुझपर ही चलते हैं, (त्वं द्विपदः चतुष्पदः बिभर्षि) द्विपाद और चतुष्पादोंको धारण पोषण करती हो, (येभ्यः मर्त्येभ्यः) जिन मर्त्य प्राणियों के लिये (अमृतं ज्योतिः) अमृत मय प्रकाश (उद्यन् सूर्यः) उदय होनेवाला सूर्य (रश्मिभिः आतनोति) अपने किरणोंसे फैलाता है, वे (इमे पंच मानवाः) ये सब पांच प्रकार के मनुष्य (तव एव) तेरे ही सुपुत्र हैं।

[८]

विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्। शिवां स्योनामनुचरेम विश्वहा ॥ १७ ॥

(ओषधीनां मातरं) ओषधियोंकी माता अर्थात् उत्पादक, (शिवां) कल्याणकारक, (स्योनां) सुखदायक, (धर्मणा धृतां) धर्मसे धारण की हुई, (ध्रुवां पृथिवीं भूमिं) स्थिर और विस्तृत भूमिको (विश्वदा) सर्वदा (विश्वस्वं) सर्वस्व अर्पण करके (अनुचरेम) सेवा करेंगे।